# आधुनिकवैज्ञानिकयुगे शान्तिशिक्षायाः आवश्यकता

**डॉ. सोमनाथसाहुः***

आधुनिकवैज्ञानिकयुगे मानवेन विकासः कृतः परञ्च विकासेन सह अनेका समस्या अपि प्रादुर्भूताः। तस्मात् कारणात् प्रेमसहयोगसत्यहिंसेत्यादीनां मानवीयमूल्यानां ह्रासः भवति। मानवीयसद्गुणा एव व्यक्तेः समाजस्य च शान्तेः आधारोऽस्ति। सद्गुणानां सञ्चाराय शान्तिशिक्षायाः अवधारणा स्वीकृता। यूनेस्कोऽनुसारेण "Violence begins from the mind" अर्थात् हिंसा व्यक्तेः मस्तिष्कात् उत्पन्ना भवति। अनया दृष्ट्या शान्तिस्थापनायाः प्रारम्भोऽपि मस्तिष्कपरिवर्तनादेव कर्तव्यः। परञ्च यदि हिंसा मस्तिष्कात् उत्पन्ना भवति तर्हि एतस्याः कारणं किम्? वर्तमानभौतिकवादियुगे मानवः सुख-साधनेन युक्तजीवनं वाञ्छति। एतस्मात् कारणात् मानवस्य जीवनं प्रतिस्पर्धात्मकं भवति। परस्परसहयोगस्य विपरीतं व्यक्तेः दृष्टिकोणं आत्मकेन्द्रितं भवति। स्वावश्यकतापूर्तये मानवो अहिंसायाः मार्गं विहाय हिसां प्रति अग्रसरं भवति। अद्यत्वे संपूर्णविश्वे वर्चस्ववृद्धः कामना अन्यथा मूलभूतावश्यकतायाः पूर्तये आकांक्षा व्यक्तेः समाजे राष्ट्रे वा हिंसकदृष्टिकोणस्य विकासं करोति। शान्तिशिक्षामाध्यमेन सर्वेषां जनानां मस्तिष्के अहिंसायाः महत्वं संस्थाय समूहे, समाजे, राष्ट्रे, वैश्विकस्तरे च शान्तिस्थापयितुं कल्प्यते। शान्तिशिक्षया जनेषु प्रमसहिष्णुतासहयोगसद्भावनादीनां गुणानां सञ्चारोऽपि भवति। अतः जनानां हृदयेषु एतेषां सर्वेषां गुणानां विकासं कृत्वा सम्पूर्णविश्वे युद्धस्य सम्भावनायाः समापनं कर्तुं शक्यते। आधुनिकवैज्ञानिकयुगे शान्तिशिक्षायाः आवश्यकता अधोवर्णितचित्रमाध्यमेन प्रस्तूयते-




* सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः, भोपालम्

उपर्युक्तचित्रेण ज्ञायते यत् संघर्षस्य निवारणं यदि शान्तिपूर्वकं भवेत् तर्हि समाजे एकता-अखण्डतायां वृद्धिः भवति परञ्च यदि शक्तेः प्रदर्शनं भवति तर्हि व्यक्तिगत-समूहगत-संस्थागतहिंसायां वृद्धिः भवति।

**शान्तिशिक्षायाः तात्पर्यम्**

सामान्यरूपेण शान्तिशिक्षायाः अवधारणा अतिप्राचीना अस्ति परञ्च शान्तिशिक्षायाः पाठ्यक्रमविषयरूपेण वा शिक्षण-प्रशिक्षणरूपेण सम्पूर्णविश्वे एकविंशतितमे ख्रिष्टाब्दे स्वीकृताऽस्ति। शान्तिशिक्षया जनेषु दुश्चिन्तायाः निवारणं कर्तुं शक्यते। अनेन मानवः स्वजीवनं शान्तिपूर्वकं यापयितुं समर्थो भवति। शान्तिशिक्षया मानवीयमूल्यानां महत्त्वं विज्ञाप्य जनान् एतेषां मानवीयमूल्यानां विषये चिन्तनाय प्रेरयितुं शक्यते। येन जनाः हिंसाघृणाभ्यां रहितो भवेयुः। शान्तिशिक्षायाः उद्देश्यं शान्तनिश्चलानुकलवातावरणस्य निर्माणमेव अस्ति। यस्मिन् जनाः सद्भावपूर्वकं वसेयुः परस्परसहयोगाय तत्पराः च भवेयुः।

यूनिसेफ इति संस्थानुसारं-शांतिशिक्षया बालेषु युवजनेषु वयस्केषु च ज्ञान-कौशल-दृष्टि-मूल्यानि च वर्धन्ते, तेन तेषु व्यवहारपरिवर्तनस्य प्रक्रिया प्रारभ्यते, येन विवादेभ्यः हिंसेभ्यः स्वात्मानं दूरीं कर्तुं, संघर्षानां शांतिपूर्णरीत्या समाधानं कर्तुं, राष्ट्रियान्ताराष्ट्रियस्तरेषु परस्परं विभिन्नेषु वर्गेषु शान्त्यै अनुकूलवातावरणस्य निर्णाणे च समर्थयन्ति।

**अलबर्टआइन्सटाइनमहोदयानुसारेण-** "शान्तिः सैन्यबलेन स्थापयितुं न शक्यते। शान्तिस्तु पारस्परिकसहयोगेन स्थापयितुं शक्यते।" सः इदमपि कथयति यत् शान्त्याः तात्पर्यं केवलं युद्धाभावमेव नास्ति अपितु सत्तारूपेण विधिन्यायोऽपि भवेत्।

**यनेस्कोऽनुसारेण** 'शान्त्याधारितशिक्षायाः उद्देश्यं जनेषु हिंसाप्रयोगस्य इच्छायाः समाप्तिः अस्ति।' शान्तिशिक्षायाः मूलाधारं मानवीयमूल्यानि एव सन्ति। यदि जनानां हृदयेषु मानवीयमूल्यानां स्थापना भविष्यति तर्हि अस्माकं समाजस्य सर्वेषां समस्यानां समाधानं भवितुं शक्यते। सामान्यरूपेण वयं कथयितुं समर्थाः स्मः यत् शान्तिशिक्षा मल्यसंवर्धनाय, पारस्परिकसहयोगेन ज्ञानार्जनाय कौशलविकासाय चास्ति। **भारतीयपरिदृश्यम्**

**प्राचीनभारतीयपरिदृश्यम्-** भारतीयसंस्कृतिः विश्वसंस्कृतिषु प्राचीनतमा स्वीक्रियते। भारतीयसंस्कृतिः जनेषु अहिंसा-प्रेम-सद्भाव-सहयोगादिमूल्यानां समावेशं करोति। भारतीयसंस्कृत्याः मूलतत्त्वं शान्तिशिक्षायाः आधारभूततत्वमऽस्ति। शान्तिशिक्षा आधुनिकवैज्ञानिकयुगस्य उद्भवोऽपि अस्ति परञ्च अस्याः बीजं तु भारतीयसंस्कृतेः वैदिककालादेव विद्यमानमस्ति। भारतीयसंस्कृतौ आत्मशान्तिमेव महत्वपूर्णं मन्यते। यतोहि

यः आत्मशान्त्यैः प्रयत्नं करोति सः समाजे, राष्ट्रे, विश्वे च शान्तिस्थापनाय प्रयासं करोति, अन्यान् शान्त्यैः प्रयत्नं कर्तुं प्रेरयति। भगवद्गीतायां कथ्यते यत् यः निष्कामभावेन कर्म करोति सः एव शान्तिं प्राप्तुं समर्थो भवति -

**"विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः।**

**निर्ममो निरहंकारः सः शान्तिमधिगच्छति॥**

शान्तिशिक्षा जनेषु सहयोगसद्भावप्रेमादिगुणानां विकासं करोति। येन जनाः मैत्रीपूर्वकं व्यवहरेयुः। अहिंसापथमवलम्ब्य स्वस्य परस्य च हिताय संलग्नाः भवेयुः। इयमेव शिक्षा वेदेष्वपि अस्ति। यजुर्वेदस्य मन्त्रे भगवतः प्रार्थनायां कामना। इयम् अस्ति यत् सर्वेः जनाः पारस्परिकसहयोगेन मित्रतया च व्यवहरेयुः-

**मित्रस्याहं चक्षुषां सर्वाणि भूतानि समीक्षे।**

**मित्रस्य चक्षुषा समीक्षामहे॥ .**

अस्माकं धर्मशास्त्रेषु सर्वत्र एतादृशेभ्यः कार्येभ्यः एवं प्रेरणा उपलभ्यते यया प्रेरणया शान्ति-सुव्यवस्था-स्नेह-सद्भावनेत्यादिनां स्थापना भवेत्, जनानां एतादृशानां मूल्यानां प्रतिञ्च आस्था भवेत्। कथ्यते यत् -

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः**

**चत्वारि तस्य वर्धन्ते आयुर्विद्यायशोबलम्।'**

भारतीयसंस्कृतिः विश्वबन्धुत्वस्य संदेशदात्री। इयं संस्कृतिः व्यक्तेः एतादृशस्य दृष्टिकोणस्य विकासं करोति येन 'वसुधैव कुटुम्बकम्" इत्येतादृशी भावना प्रकटिता भवति। भारतीयसंस्कृतिः प्राचीनकालादेव 'यत्र विश्वं भवेत्येकनीडम्' इत्यस्य शिक्षां प्रदाय मानवस्य दृष्टिकोणं व्यापकं करोति। व्यक्तेः यदा 'आत्मवत् सर्वभूतेषु' भावनायाः विकासं भविष्यति तदैव जनानां हृदयेषु ईर्ष्याद्वेषादयः समाप्ताः भविष्यन्ति। भारतीयसंस्कृत्याः संवाहकाः धर्मग्रन्थाः एतादृशैः उद्धरणैः समृद्धाः सन्ति, ये मानवान् सन्मार्गं प्रति प्रेरयन्ति अथ च 'अयं निजः परोवेति' इति भावनां दूरीं करोति। भारतीयपरम्परायां प्राचीनकालादद्यावधिपर्यन्तं गुरुः शिष्यान् समाजस्य कल्याणाय प्रेरयन्ति-

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**

**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभागभवेत्॥**

मनुस्मृत्यां धर्मस्य दशलक्षणानि वर्तन्ते, तेऽपि मानवान् सन्मार्गाय प्रेरयन्ति -

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**

**धीरविद्यासत्यक्रोधो दशकं धर्मलक्षणम्॥**

प्राचीनकालादद्यावधिपर्यन्तं मूल्यशिक्षया समाजे शान्तिस्थापनाय प्रयत्नम् अनवरतरूपेण भवन्ति। भारतीयानाञ्च मनसि मूल्यानां स्थापनायाः कार्यञ्च कुर्वन्ति।

**वर्तमानभारतीयपरिदृश्यम्-** वर्तमानकाले भारतवर्षे 'राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषद्' इति नाम्नः संघटनमपि शान्तिशिक्षायैः प्रयासरतं वर्तते। इत्यनेन संघटनेन विद्यालयेषु शिक्षकाणां कृते शान्तिशिक्षायाः उन्मुखीकरणकार्यक्रमस्य व्यवस्थाऽपि क्रियते। विवादानां समाधानाय शान्तिशिक्षायाः प्रशिक्षणस्य व्यवस्थाऽपि क्रियते। प्रशिक्षितशिक्षकेभ्यः अपेक्षा भवति यत् विद्यालयीयस्तरे समुदायस्तरे च अस्मिन् विषये ते प्रशिक्षणं कुर्युः। इत्यनेन संघटनेन शान्तिशिक्षायाः शिक्षकप्रशिक्षणकार्यक्रमाणामङ्गतया शान्तिशिक्षा स्वीकृताऽस्ति।

राष्ट्रियान्ताराष्ट्रियसंघटनानां माध्यमेन शान्तिशिक्षामुन्नेतुं विभिन्ननाम्ना माध्यमेन उच्चस्तरीयाः प्रयासाः क्रियमाणाः सन्ति। यथा- शान्तिशिक्षा, मानवाधिकारशिक्षा, पर्यावरणशिक्षा, सामाजिकन्यायशिक्षा इत्यादयः। एतैः विभिन्ननाम्ना प्रचलिता शिक्षा एकमेव उद्देश्यं स्वीकृत्य मूलनिमित्ताय कार्यं क्रियमाणमस्ति।

यूनिसेफ यूनेस्को च शान्तिशिक्षायाः कृतेः विशेषः प्रयासः क्रियमाणे स्तः। यूनीसेफ इति संघटनं शान्तिशिक्षां विद्यालयीयशिक्षा अन्येषाञ्च शैक्षिकप्रयासानां रूपे वर्णितं क्रियमाणमस्ति-

1. यत् शान्तिमण्डलरूपे (Zone of peace) कार्यं करोति, यत्र बालकाः हिंसकसंघर्षात् दूरं भवेत्।
2. एतादृशवातावरणस्य निर्माणं करोति येन अधिगमसमुदायस्य सर्वेषु जनेषु शान्तिपूर्णं सम्मानजनकञ्च व्यवहारस्य सृजनं भवेत्।
3. प्रशासनिकनीतिषु अभ्यासे च समानतायाः सिद्धान्तानां अहिंसायाश्च प्रदर्शनं करोति।
4. विवादानां समाधानं शान्तिपूर्वकं भवति, येन सम्मिलितजनानां प्रतिष्ठाऽधिकारयोः सम्मानं भवेत्।
5. एतादृशः क्षेत्रः प्रदानं करोति यत्र शान्तिपरकमूल्येषु सामाजिकन्याये च स्पष्टरूपेण विवेचनं भवेत्।
6. सम्पूर्णपाठ्यचर्यायां शान्तिं प्रति अवबोधं मानवाधिकाराणां सामाजिकन्यायस्य वैश्विकतथ्यानाञ्च एकीकरणं करोति।
7. अधिगमविधिषु प्रतिभागितायां समस्यासमाधाने च भेदान् प्रति सम्मानोपरि बलमस्ति।

यूनिसेफ 1990 तमे वर्षे "सर्वेभ्यः शिक्षा" इत्यस्य घोषणापत्रे स्पष्टरूपेण कथ्यते यत् अधिगमस्य मूलावश्यकता केवलं पठनपाठनगणनामात्रञ्च योग्यता नास्ति अपितु विकासे सहभागिता, प्रतिष्ठापूर्वककार्यकरणाय ज्ञानकौशलाभिवृत्तिमूल्यानां प्राप्तिः अस्ति। अग्रे लिखितमस्ति यत् व्यक्तेः आवश्यकतानां सन्तुष्टेः सामाजिक-न्यायानां, मतभेदानां स्वीकृतिं शान्त्याः विकासस्य उत्तरदायित्वमापि निहितमस्ति।

2000 तमे वर्षं शान्तिसंवर्धनवर्षस्य रूपे 2001-2010 इति च दशकं शान्तिसंवर्धनस्य अन्तरराष्ट्रियदशकरूपे आयोजितं कृतो वर्तते। शान्तिशिक्षायाः उन्नत्यैः यूनस्को इत्यनेन संघटनेन शान्तिशिक्षापुरस्कारमपि प्रदानं क्रियते। यत् शान्तिशिक्षायाः क्षेत्रे सर्वश्रेष्ठकार्यकरणाय प्रदानं क्रियते।

**विषयवस्तु**

शान्तिशिक्षया पाठ्यवस्तुनः स्वरूपं कि भविष्यति, अस्मिन् संदर्भे शिक्षासंस्थासु शिक्षाशास्त्रिषु च मतैक्यं नास्ति। शान्तिशिक्षाकार्यक्रमस्य विकासस्य प्रारम्भिकचरणेषु यूनेस्को(1974) इत्यनेन संघटनेन मानवजीवनस्य अत्यन्तमहत्त्वपूर्णसमस्यानां चयनं कृत्वा शान्तिशिक्षायाः विषयवस्तुरूपेण प्रस्तुतम्। इत्यस्य प्रमुखाः तथ्याः सन्ति जनसामान्यस्य समानतायाः अधिकारम्, शान्तिस्थापनाय प्रयत्नम्, युद्धानां कारणानि प्रभावाश्च, निःशस्त्रीकरणं, विभिन्नराष्ट्रानां मध्ये आर्थिकसांस्कृतिकराजनीतिकसम्बन्धानां प्रकृतिः प्रभावश्च। एतेषां सम्बन्धानां कृते अन्तरराष्ट्रियनियमानां महत्वं विशेषरूपेण शान्तिस्थापनाय, प्राकृतिकसंसाधनानां प्रयोगसंरक्षणञ्च, विकासशीलराष्ट्रानां सहयोगाय साधनानि मार्गादि च, आर्थिकवृद्धिः सामाजिकविकासश्च अथ च सामाजिकन्याये द्वयोः भूमिका, जनसंख्यावृद्धिः सम्बन्धितप्रश्नाश्च। एतेषां सर्वेषां तथ्यानां प्रभावदुष्प्रभावस्य अध्ययनेन विश्लेषणेन च समाजे राष्ट्रे विश्वे च शान्तिस्थापनायाः प्रयासं कर्तुं शक्यते।

"युनेस्को" नाम्नाः संघटनेन प्रस्तुतं अस्यां योजनायां अनेकाः तथ्याः वैश्विकस्तरे मानवजीवनस्य समस्यायैः सम्बन्धितं वर्तते। जनेषु शान्तिं प्रति जागरूकता, जीवनशैल्याम् उन्नयनं, स्ववातावरणं प्रति जागरूकता, युद्धानां दुष्परिणामान् प्रति सचेतता, शास्त्राणामानावश्यकं प्रयोगस्य विंध्वसान् प्रति जागरुकता च शान्तिशिक्षायाः उद्देश्यानि सन्ति। येन वैश्विकस्तरे शान्तिः स्थापना भवेत्। शान्तिशिक्षायाः मुख्यमुद्देश्यमस्ति जनानां ज्ञाने, कौशले, दृष्टिकोणे च परिवर्तनं कृत्वा शान्त्याः संस्कृतेः स्थापना तस्य सुस्थिरिकरणञ्च।

भारतवर्षे 'राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षणपरिषद्' इत्यनेन संघटनेन शान्तिशिक्षां विद्यालयीयपाठयक्रमस्य आवश्यकाङ्गरूपेण स्वीकृत्य पाठ्यक्रमे समानता सामाजिकन्याय-मानवाधिकार सहिष्णुता-सांस्कृतिकविविधतेत्यादिविषयाणां समावेशस्य अनुशंसाऽपि कृता।

**शान्तिशिक्षायाः महत्त्वम्**

वर्तमानकाले शान्तिशिक्षा कस्यापि समाजस्य राष्ट्रस्य महत्त्वपूर्णावश्यकता विद्यते। शान्तिं प्रति सर्वेषां जनानां सन्नद्धता सिद्ध्यर्थं शिक्षा आधारभूता विद्यते। यदि समाजे शिक्षायाः वा ज्ञानस्य प्रसारं भविष्यति तर्हि तत्र शान्तिरपि भविष्यति। महात्मागाँधीमहोदयः इदम् मन्यते यत् विश्वे शान्तिस्थापनाय बाला एव सर्वश्रेष्ठमाध्यममस्ति। सः इदमपि उक्तवान् यत् " यदि वयं इदं विश्वं वास्तविकशान्तेः शिक्षा दातुं इच्छामः, युद्धस्य विरुद्धे वास्तविकयुद्धं कर्तुं इच्छामः तर्हि एतत् प्रारंभ बालकात् एव करणीयम्।" अतः विश्वबन्धुत्वस्य भावनां वर्धित्वा सम्पूर्णविश्वे शान्तिस्थापनाय विद्यालयानां पाठ्यक्रमेषु सार्वभौमिकजीवनमूल्येषु आधारितानां विषयानां समावेशमावश्यकम्। येन विद्यालयस्य विद्यार्थिनां विकासं न केवलं स्वदेशस्य नागरिकरूपेण अपितु विश्व-नागरिकरूपेण भवितुं शक्यते। शान्तिस्थापनार्थं यस्यावदानस्यावश्यकता भवति तस्य प्राथमिकशिक्षास्तरे समायोजनमपि आवश्यकमस्ति।

यदा मानवानां हृदयेषु अहिंसा, सद्भावः, सहिष्णुता इत्यादिगुणानां प्रति विश्वासं भविष्यति तदा एव समाजे शान्तिस्थापना भविष्यति। एतत्प्रयासेन मानवानां हृदयेषु एतादृशानां मूल्यानां स्थापनाः भविष्यति येन न केवलं वर्तमानमपितु भाविकालमपि सुरक्षितं स्थास्यति।

निष्कर्षरूपेण वक्तुं शक्यते यत् शान्तिशिक्षायाः मुख्यमुद्देश्य मानवस्य युद्धस्यय भयावहप्रभावात् रक्षणमेव। प्रयासोऽयं पूर्वमेव जातः, द्वयोः विश्वयुद्धयोः परिणाममस्ति याभ्यां मानवजीवनं (विशेषरूपेण यूरोपीयदेशेषु) अतिक्रान्तत्रासदी सोढुं बाधितं आसीत्। अस्य मूलोद्देश्यमिदमेवास्ति यत् भाविसन्ततीं एतादृशी त्रासदीतः रक्षायाः प्रयासः करणीयः। सहिष्णुता-अन्येषां विचाराणां सम्मानप्रदानम्, स्वस्य आवेगान् नियन्त्रिकरणस्य योग्यता, पारस्परिकसौहार्दभावेन कार्यकरणस्य प्रवृतिः जनानामन्तस्थे विकासः विधयः। अनेन जनान् हिंसायाः दुष्परिणामेभ्यः परिचयं कारयित्वा स्वस्य संघर्षान् विवादान् च अहिंसात्मकशैल्या निवारणस्य योग्यतायाः विकासः क्रियमाणमस्ति येन ते हिंसातः पृथगेव भवेत्।

**सन्दर्भग्रन्थसूची**


1. शुक्ला, मीना : (2000), स्मृति ग्रन्थों में वर्णित समाज, इस्टर्न लिंकर्स, दिल्ली-110007
2. टण्डन, किरण : (2006), भारतीय संस्कृति, इस्टर्न बुक लिंकर्स दिल्ली-110
3. झा, गंगानाथ (संपादक) : (1999), मनुस्मृति, परिमल पब्लिकेशन्स
4. त्रिपाठी, तीर्थराजशास्त्री : (1999), वैदिक प्रवचन मञ्जरी, प्रदीप प्रकाशन नयीदिल्ली।
5. शर्मा, विश्वनाथ : (1961), हितोपदेश, मोतीलाल बनारसीदास, दिल्ली-110007
6. मिश्र, भास्कर : (1995), शिक्षा एवं संस्कृति, भावना प्रकाशन, दिल्ली।
7. Singh, Suresh Pal : (2011), Education for World Peace, Discovery Publishing House.
8. Finley Laura : (2011), Building a Peaceful Society, Barery University.
9. साहु सोमनाथ (2013), जगदीश संस्कृत पुस्तकालय, जयपुर